(yamankalyani)
भज गोविन्दं भज गोविन्दं
गोविन्दं भज मूढमते
सम्प्राप्ते सन्निहिते काले
नहि नहि रक्षति डुकृञ्करणे ॥

(brindavan saranga)
मूढ जहीहि धनागमतृष्णाम्
कुरु सद्बुद्धिं मनसि वितृष्णाम्
यल्लभसे निज कर्मोपात्तं
वित्तं तेन विनोदय चित्तम् ॥

(pantuvarali)
यावद्वित्तोपार्जन सक्तः
तावन्निज परिवारो रक्तः
पश्चाज्जीवति जर्जर देहे
वार्तां कोऽपि न पृच्छति गेहे ॥

(bageshri)
मा कुरु धन जन यौवन गर्वं
हरति निमेषात्कालः सर्वम्
मायामयमिदमखिलं हित्वा
ब्रह्मपदं त्वं प्रविश विदित्वा ॥

(behag)
सुर मन्दिर तरु मूल निवासः
शय्या भूतलमजिनं वासः
सर्व परिग्रह भोग त्यागः
कस्य सुखं न करोति विरागः ॥

(nadanamakriya)
भगवद् गीता किन्चिदधीता
गङ्गा जललव कणिकापीता
सहृदपि येन मुरारि समर्चा
क्रियते तस्य यमेन न चर्चा ॥

(kapi)
पुनरपि जननं पुनरपि मरणं
पुनरपि जननी जठरे शयनम्
इह संसारे बहुदुस्तारे
कृपयाऽपारे पाहि मुरारे ॥

(senjurutti)
अर्थमनर्थं भावय नित्यं
नास्तिततः सुखलेशः सत्यम्
पुत्रादपि धन भाजां भीतिः
सर्वत्रैषा विहिता रीतिः ॥

(mohanam)
गेयं गीता नाम सहस्रं
ध्येयं श्रीपति रूपमजस्रम्
नेयं सज्जन सङ्गे चित्तं
देयं दीनजनाय च वित्तम् ॥

(sindhubhairavi)
गुरुचरणाम्बुज निर्भर भक्तः
संसारादचिराद्भव मुक्तः
सेन्द्रियमानस नियमादेवं
द्रक्ष्यसि निज हृदयस्थं देवम् ॥